# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| | | |
|---|---|---|
| कक्षा - आचार्यद्वितीयवर्षम्, सत्र-३ | **प्रश्नपत्रम् – २**<br>(C.C.5.3.7- New )<br>**भगवद्गीता-शाङ्करभाष्यसहिता**<br>**( अष्टादशोऽध्याय: )** | गुणा: - ७० |
| विषय: - सर्वदर्शनम् | | |
| दिनाङ्कः - ०५/१२/२०१८ | | समय: - १०:०० त: ०१.०० |

**प्रथमान्विति:**

**प्रश्न: १ कस्यचिद् एकस्य श्लोकस्य यथाभाष्यं व्याख्यां लिखत ।** **( ०५ )**

*(१) यज्ञदानतप: कर्म न त्याज्यं कार्यमेव तत् ।*
*यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥*

*(२) पञ्चैतानि महाबाहो कारणानि निबोध मे ।*
*साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥*

**प्रश्न: २ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) कर्मत्यागस्य त्रैविध्यं प्रतिपादयत ।*

*(२) कर्मणि प्रवर्तकानि तदाश्रयश्च प्रतिपाद्यताम् ।*

**द्वितीयान्विति:**

**प्रश्न: ३ कस्यचिदेकस्य श्लोकस्य यथाभाष्यं व्याख्यां लिखत ।** **( ०५ )**

*(१) नियतं सङ्गरहितमरागद्वेषत: कृतम् ।*
*अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥*

*(२) धृत्या यया धारयते मन: प्राणेन्द्रियक्रिया: ।*
*योगेनाव्यभिचारिण्या धृति: सा पार्थ सात्त्विकी ॥*

**प्रश्न: ४ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) सुखस्य गुणत: त्रैविध्यं कथयत ।*

*(२) गीताशास्त्रानुसारं चातुर्वर्ण्यस्य कर्मविभागं प्रदर्श्य तस्य साम्प्रतकाले उपयोगितां वर्णयत ।*

**तृतीयान्विति:**

**प्रश्न: ५ कस्यचिदेकस्य श्लोकस्य यथाभाष्यं व्याख्यां लिखत ।** **( ०५ )**

*(१) श्रेयान्स्वधर्मो विगुण: परधर्मात्स्वनुष्ठितात् ।*
*स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥*

*(२) ब्रह्मभूत: प्रसन्नात्मा न शोचति न कांक्षति ।*
*सम: सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥*

**प्रश्नः ६ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) ज्ञाननिष्ठायाः प्राप्त्युपायान् वर्णयित्वा ज्ञानोत्तरकृतकर्मणां भगवदर्पणेनैव शास्वतपदप्राप्तिः इति कथनं निरूपयत ।*

*(२) ईश्वरशरणागत्या परमपदप्राप्तिकथनं वर्णयत ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ कस्यचिदेकस्य श्लोकस्य यथाभाष्यं व्याख्यां लिखत ।** **( ०५ )**

*(१) मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।*
*मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥*

*(२) नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।*
*स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥*

**प्रश्नः ८ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) गीताशास्त्रस्य सारभूतोपदेशं स्वशब्दैः निबध्नीत ।*

*(२) प्रस्थानत्रय्यां भगवद्गीतायां वैशिष्ट्यं प्रतिपादयत ।*

**प्रश्नः ९ केषाञ्चन दशप्रश्नानाम् अतिलघूत्तराणि लिखत ।** **( १० )**

*(१) केशिनिषूदनः कः ?*
*(२) त्यागः कतिविधः परिकीर्तितः ?*
*(३) देहभृता किं त्युक्तुं न शक्यम् ?*
*(४) कानि पञ्चकरणानि ?*
*(५) किं कर्म न त्याज्यम् ?*
*(६) कः त्यागः सात्त्विकः उच्यते ?*
*(७) हर्षशोकान्वितः कर्ता कः ?*
*(८) कृषिगोरक्ष्यवाणिज्यं कस्य कर्म विद्यते ?*
*(९) को नाम अनुबन्धः ?*
*(१०) विषादी दीर्घसूत्री च कर्ता कीदृशः ?*
*(११) किं नाम दाक्ष्यम् ?*
*(१२) अष्टादशाध्यायस्य नाम किम् ?*
*(१३) योगेश्वरः कः ?*
*(१४) गीतायां कति श्लोकाः सन्ति ?*
*(१५) सञ्जयः कस्य प्रसादात् कृष्णार्जुनयोः संवादं श्रुतवान् ?*

--००--